Volume IV, 1939-1940] [Part 1

ANNALS

OF

ORIENTAL RESEARCH

OF THE UNIVERSITY OF MADRAS

UNIVERSITY OF MADRAS

1939

FRAGMENTS OF PAIṬHĪNASI DHARMASŪTRA

By

T. R. Chintamani

Dharma Sūtra literature is at present restricted to a few extant works like the Dharma Sūtras of Āpastamba, Bodhāyana, Hiraṇyakeśin, Gautama, Vaikhānasa, Viṣṇu, Vasiṣṭha, Sumantu. Other Sūtra works on Dharma, if extant, are not available to us at present. Among the extant works we find sūtras belonging to the Ṛgveda, Yajurveda and Sāmaveda. Vasiṣṭha's work belongs to the Ṛgveda and Gautama's to the Sāmaveda. The rest belong to the Yajurveda. Due apparently to the numerical strength of the followers of the Yajurveda a large number of Dharmasūtra texts belonging to that school have been preserved.

Several Dharmasūtras have, in course of time, come to be remembered only in citations and many more only in name. Among the former we find works belonging to the Ṛgveda, Yajurveda, Sāmaveda and Atharvaveda. Among such works, mention may be made of the Sūtra of Hārīta, belonging to Yajur Veda in the Maitrāyaṇīya Śākhā, that of Śaṅkha Likhita belonging to the same Veda in the Vājasaneya Śākhā; and others like those of Devala, Cyavana, Jātūkarṇya, Marīci etc., which cannot be assigned to any śākhā in any Veda, as the material available is very scanty. The restoration, at least in a fragmentary form, of all these sūtras from the available citations in Dharmaśāstra digests is likely to shed more light on the development of social, religious and political aspects of life in ancient India. The extracts from the sūtras of Śaṅkha Likhita have been already brought together by Mr. P. V. Kane. A collection of the sūtras of Hārīta is being published by the Madras University. Those of Paiṭhīnasi are being presented now.

The writings of sages of old are found to be sometimes in verse and sometimes in prose. Authors of later digests do make a clear distinction between the two kinds of compositions. Gadya Vyāsa, Śloka Gautama, etc., are cited independently of Padya Vyāsa and Gadya Gautama. In several cases, we are able to note that the metrical version is a later production or recast of the prose version. Very probably for purposes

of easy memorising, the prose was recast into metrical form by later writers. In most of these cases, those that were responsible for putting them in metrical form remain anonymous, for they are convinced of the fact that their own contribution to the subject is little or only next to nothing. Chronologically therefore, the prose version of a smṛti may be regarded as older than the metrical version of the same. In presenting the extracts from Paiṭhīnasi I have been guided by this principle and I have contended myself by referring to the prose extracts alone.

Paiṭhīnasi seems to have been a follower of the Atharvaveda. This view is shared by Drs. Jolly and Caland, and is mainly based on the extracts dealing with the Śrāddhakalpa.

Yājñavalkya mentions a number of writers on Dharma Śāstra but does not mention Paiṭhīnasi. Gautama does not include Paiṭhīnasi in his list. Parāśara also omits this name. On the other hand the Bhaviṣya Purāṇa mentions Paiṭhīnasi as the author of an Upasmṛti. Mitramiśra in his Vīramitrodaya also refers to Paiṭhīnasi as an Upasmartā. To Paiṭhīnasi himself is attributed the following verses in which his own name also is found, though he does not refer to himself as an Upasmartā. The verses are

तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो भृगुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ॥
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च ।
सत्यव्रता भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा ॥
जाबालिर्जमदग्निश्च लौकाक्षिर्ब्रह्मसंभवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥[1]

Lakṣmīdhara in his Kalpataru, while commenting on the word आदि in the sūtra of Śaṅkhalikhita

तेषां प्रणेतारो मनुविष्णुयमदक्षाङ्गिरोऽत्रिबृहस्पत्युशनआपस्तम्बवसिष्ठकात्यायनपराशरव्यासशङ्खलिखितसंवर्तगौतमशातातपहारीतयाज्ञवल्क्यप्रचेतसादयः

1. Smṛticandrikā, Āhnika, 1.
Vīramitrodaya, Paribhāṣā, 15-16.

is said to have remarked[1] :—

आदिशब्देन बुधदेवलसोमजमदग्निविश्वामित्रप्रजापतिनारदपैठोनसिपितामह-बौधायनछागलेयजाबालिच्यवनमरीचिकश्यपा उक्ताः।

From these it may be seen that Paiṭhīnasi was the author perhaps of only an Upasmṛti and was later than the authors of the major Dharma Sūtras.

On the other hand, we find Viśvarūpa, the earliest of the later day authors of digests, referring to Paiṭhīnasi. We know that Viśvarūpa was the pupil of Śaṅkara who lived between 655-687. So by the middle of the 7th century the Smṛti of Paiṭhīnasi held an important place, as to be cited as an authority.

In the following pages the prose extracts found in the name of Paiṭhīnasi are brought together and are classified according to the subject matter. They are distributed under the following divisions :—

1. Saṁskāra.
2. Āhnika.
3. Ācāra.
4. Śrāddha.
5. Āśauca.
6. Vyavahāra.
7. Prāyaścitta.
8. Miscellaneous.

1. See Vīramitrodaya, Paribhāṣā, 16.

SAMSKARA

FRAGMENT 1.

गर्भपञ्चमे ब्राह्मणमुपनयेत् गर्भाष्टमे वा गर्भैकादशे राजन्यं गर्भद्वादशे वैश्यं गर्भषोडशे वा ॥

Hemādri, Pari. II, 745.

FRAGMENT 2.

कार्पासमुपवीतं[1] ब्राह्मणस्य क्षौमं राजन्यस्य आविकं वैश्यस्य ॥

P.M., I, ii, 35 ; V.M. Saṁ., 416 ; Govind. Saṁ., 129-b ; Catur. Sa., 21.

1. V. M. and Govind. add षट्तन्तु त्रिवृतं

FRAGMENT 3.

मौञ्जी मेखलाश्मन्तकी ब्राह्मणस्य ॥

Apa. I, 28 ; V.M. Saṁ., 431.

FRAGMENT 4.

उत्तानाभ्यां हस्ताभ्यां दक्षिणेन दक्षिणं सव्यं सव्येन पादावभिवादयेत् । दक्षिणोपरिभावेन व्यत्यासो वायं शिष्टसमाचारात् ॥

Kullūka, II, 72 ; V.M. Saṁ., 457.

FRAGMENT 5.

[2]कुलोत्पन्नां [3]साध्वाचारां वरयेत् । [4]पितृष्वसृमातृष्वसृदुहितरो मातुलसुता[5] च[6] धर्मतस्ता भगिन्यो वर्जयेत् ॥

S.C. Saṁ., 190 ; V.M., Saṁ., 715 ; G.R., 10 ; Govind. Saṁ., 48-a ; Catur. Sa., 95.

2. S. C. omits कुलो ... येत्
3. G. R. युक्ताचारां
4. All except V. M. पितृमातृष्वसृ Catur. Sā. omits up to वरयेत् and reads the rest thus :- पितृमातृष्वसृदुहितरः मातुलसुता धर्मतः भगिन्यस्ता वर्जयेत् ॥
5. G. R. सुताः
6. S. C. omits च

FRAGMENT 6.

[7] असमानार्षेयीं [8]कन्यां वरयेत् । [9] पञ्च मातृतः परिहरेत्[10] । सप्त[11] पितृतः । त्रीन्मातृतः पञ्च पितृतो[12] वा[13] ॥

Vijñā., I, 53; Apa., I, 53; Ujjvalā, II, v. 10; P.M., I, ii, 61, 223; G.R., 10; V.M. Saṁ., 703 and 707; Madana, 139; Saṁ. M., 50; V.P., 694, 698; S.R., 409; Govind. Saṁ., 36-b; Catur. Sa., 93; D.K., 8, N.S., 263.

7. Govind and Catur. Sa. omit अस...येत्

8. V. M. र्षेयां

9. P.M., Sam. M. and Catur. Sa. पञ्चमीं

10. G.R. omits परिहरेत् here but adds it after पितृतः

11. P.M., Sam. M. and Catur. Sa. सप्तमीं

12. G. R. adds इति

13. Vijñā., Mādhava (P.M. I, ii, 223), Madana and Govind. read as follows:— पञ्च मातृतः सप्त पितृतः त्रीनतीत्य मातृतः पंञ्चातीत्य वा पितृतः

The reading in V.P., 698 and N.S., is:—

त्रीन् मातृतः पञ्च पितृतः पुरुषानतीत्य उद्वहेत् ।

G.P., 224 and D.K., 8 read त्रीन् मातृतः पञ्च पितृत इति वा । D.K. omits इति alone.

S.R. reads त्रीनतीत्य मातृतः पञ्चातीत्य पितृतः ।
D.K. reads in a different place (p. 8)

असमानार्षगोत्रजां कन्यां वरयेत् । परिहरेत् पञ्च मातृतः सप्त पितृतः । पञ्च पितृतो वा ॥

FRAGMENT 7.

ब्राह्मप्राजापत्यार्षदैवा ब्राह्मणस्य गान्धर्व आसुरो राजन्यस्य पैशाचः शूद्रस्य सर्वेषामार्षं प्रमाणमार्षं वेदवाक्यम् ॥

G.R., 61-2.

FRAGMENT 8.

तस्मान्नग्निकां कन्यां सहिरण्यां दद्यात् । अयं [13a]ब्राह्मो विवाहः ॥

G.R., 67; V.M. Saṁ., 848.

13a. G.R. स ब्राह्मो

FRAGMENT 9.

शुल्केन [14] पणित्वा ददतो राक्षसः ॥

G.R., 72; Govind. Saṁ., 90-a; V.M. Saṁ., 853.

14. V. M. कन्यामाददतो

FRAGMENT 10.

साङ्गुष्ठं ब्राह्मण्याः पाणिं गृह्णीयात् । क्षत्रियायाः [15] सशरम् । वैश्यायाः [15]सप्रतोदम् । शूद्राया वस्त्रदशाम् । [15a]परिक्रमो ब्राह्मणस्योक्तो राजन्यवैश्ययोराचार्यपरिक्रमः ॥

P.M., I, ii, 98; G.R., 57; Govind. Saṁ., 81a.

15. G.R. and P.M. omit स
15a. G.R. and Govind. omit from here to end.

FRAGMENT 11.

यावन्नोद्भिद्येते [16] स्तनौ [17] तावद्देया । अथ ऋतुमती भवति, [18]दाता प्रतिग्रहीता [18a]च नरकमाप्नोति [19] । पिता पितामहश्चैव विष्ठायां जायते [20]क्रिमिः तस्मान्नग्निका देया[21] ॥

Hemādri, Pari. II, 804; G.R., 45; Govind. Saṁ., 67-b; Bāla., II, 205.

16. G. R. उद्भिद्यतः Hemādri उद्भिद्यतौ
17. G. R. and Bāla. तावदेव देया
18. G. R. adds तदा
18a. Bāla. omits च
19. Hemādri प्राप्नोति
20. Hemādri omits क्रिमिः The last sentence is read in the Bāla thus:—
पिता पितामहः प्रपितामहश्च विष्ठायां जायन्ते। तस्मान्नग्निका दातव्या ॥
21. G.R. दातव्या

FRAGMENT 12.

[22]अलाभे कन्यायाः स्नातकव्रतं चरेत् । अपि वा क्षत्रियायां पुत्रमुत्पादयेत्[23] [24] वैश्यायां वा । शूद्रायां वेत्यन्ये[25] ॥

P.M. I, ii, 96; G.R., 34; Govind. Saṁ., 94b; V.M. Saṁ., 748.

22. G. R. अलाभे कन्यकायाश्च स्नातकव्रतमाचरेत्। अपि क्षत्रि
23. P. M. ग्रीत G.P. पुत्रानुत्पादयीत
24. P. M. omits वैश्यायां वा; Govind. omits वा only
25. P. M. वेत्येके. G. P. omits this sentence; G. R. omits वेत्यन्ये

FRAGMENT 13.

ऋतुमुपासीत । तस्मिन्नपि पर्वाणि वर्जयेत् । पुमांसमुपपाद[मुत्पाद]येत् ॥

Hemādri, Pari. II, 724.

FRAGMENT 14.

[26]स्नात्वा शुचिः प्रेतं[27] मनसा ध्यायन् दक्षिणाभिमुखः त्रीनुदकाञ्जलीन् निनयेत्[28] । [29]शावदाहप्रभृति एकादशेऽह्नि विरमेत् ॥

Apa. III, 4; Hāra. 147; P.M., I, ii, 288; S.C. Āśau. 100; Hemādri, Pari. I, 1585.

26. Apa., Hemādri, P. M. and Hāra. omit. स्नात्वा शुचिः

27. Hāra: मृतम् । Hemādri omits this word.

28. Hāra. निक्षिपेत् । P. M. cites only up to this.

29. Apa. शाव प्रकृत्यैकादशाहे Hāra. and Hemādri शावप्रभृत्येकादशाहे.

FRAGMENT 15.

तृणपर्णोदकेन अङ्गुल्या वा दन्तान् धावयेत् प्रदेशिनीवर्जम् ॥

S.C. Āh., 281.

FRAGMENT 16.

"हिरण्यवर्णाः" इति सूक्तेन स्नात्वो शौचं कृत्वा अपां मध्ये त्रीन् प्राणायामान् कुर्यात् ॥

Hemādri, Pari. I, 900.

FRAGMENT 17.

अन्तरुदक आचान्तोऽन्तः[30] शुद्धो भवति । बहिरुदक आचान्तो बहिरेव [31]शुद्धिः स्यात्[32] । तस्मादन्तरेकं बहिरेकं चपादं[32a] कृत्वाआचामेत्[32b] सर्वत्र शुद्धो[33] भवति ॥

S.C. Āh., 272; Hemādri, Pari. I, 908-9; G.P. Ācāra., 70. M.M.Y., I, 20.

30. S. C. and M. M. Y. एव शुद्ध्यति G. P. adds एव
31. S. C. and M. M. Y. शुद्ध्यति Hemādri शुद्धः
32. G. P. भवति and omits the rest of the citation.
32a. All except M. M. Y. read पाद after कृत्वा
32b. S. C. आचमनं Hemādri and G. P. आचरेत्
33. M. M. Y. प्रयतः

FRAGMENT 18.

गन्धलेपक्षयाद्वा प्रक्षाल्याचम्य प्रयतो भवति ॥

Cha. Ā., 2-b.

FRAGMENT 19.

अग्निरङ्गुष्ठः तस्मात्तेनैव सर्वाणि स्थानानि स्पृशेत् ॥

S.C. Āh., 259; Madana, 55.

FRAGMENT 20.

[33a] सव्ये पाणौ शेषा अपो निनयेत् ॥

S.C. Āh., 258; Madana, 54; Sadā. 14a.

33a. Sadā. adds ततः at the beginning.

FRAGMENT 21.

वैवाहिकमग्निं समिन्धीत सायंप्रातर्यथाकालं समिध अभ्यादध्यात् "अग्नये प्रजापतये अनुमतये" इति सायम् । "सूर्याय प्रजापतये अनुमतये अग्नये स्विष्टकृते च सूर्याय प्रजापतये अनुमतये"॥

G.R., 94.

FRAGMENT 22.

मुखमग्निर्देवानां मनुष्याणां तस्मादग्निमादधीत अग्निमुखा देवा हव्यं वहति देवानां कव्यं पितृणां सायंप्रातर्बलिहरणं दर्शपूर्णमासौ वेष्टिरष्टका पशुबन्धः पिण्डपितृयज्ञ इति पाकयज्ञः ॥

G.R., 96.

FRAGMENT 23.

अग्निमेवेनोपासीत नान्यं दैवतम् । अग्निर्भूय्यामिति विज्ञायते । न प्रवसेत् । यदि प्रवसेदुक्तमुपस्थानं चलितस्य प्राशितमभ्यावेयं जुहुयात् ॥

G.R., 100.

FRAGMENT 24.

औपवसथ्येऽहनि भुक्तं हविष्यमित्युक्तम् । न क्रुध्येत् । नानृतं वदेत् । न वृथा जनैः सह संभाषेत । शुचिर्दान्तोऽप्रमत्तो जितेन्द्रियो व्रजेत् । मध्याह्नस्योपरिष्टाद्धविष्यं बहि[र्बर्हि]रेधांसि संनिधाप्याग्निपरिग्रहणं कृत्वा न प्रसरेत्। अधः शयीत कामं बाधयेत् । पौर्णमास्यां कृत्तश्मश्रुः अलङ्कृतोऽभ्यक्तो गन्धपुष्पाणि सेवेत। पितरोहवे शुचिकामः । श्राद्धकल्पेन ब्राह्मणतर्पणं व्याख्यातम् ॥

G.R., 113.

FRAGMENT 25.

रथ्यामाक्रम्य कृतमूत्रपुरीषः पञ्चनखास्थ्यस्नेहं स्पृष्ट्वा आचान्तः पुनराचामेत् । चण्डालम्लेच्छसंभाषणे च ॥

Hemādri, Pari. I, 967; Acā. M., 14.

FRAGMENT 26.

भुक्त्वा क्षुत्वा च सुप्त्वा च वासश्च विपरिधाय कलिलकासश्वासगमे च रथ्याचत्वरश्मशानाक्रान्तेष्वाचान्तः पुनराचामेत् ॥

Hemādri, Pari. I, 966; Acā. M., 14.

FRAGMENT 27.

[33b]अङ्गुष्ठेन प्रदेशिन्या च [33c]नासिके स्पृशेत् अङ्गुष्ठानामिकाभ्यां [33d]च नेत्रे[33e]कनीनिकाङ्गुष्ठाभ्यां च श्रोत्रे [33f]मध्यमिकया मुखं अङ्गुष्ठेन नाभिं सर्वाभिः शिरः प्रदेशिनी वायुः अनामिका सूर्यः कनीनिका मघवान् मध्यमिका प्रजापतिः अङ्गुष्ठः तस्मात्तेनैव सह सर्वाणि स्थानानि स्पृशति वायुः सूर्य इन्द्रः प्रजापतिः अग्निः इत्येता देवता एनं पुनीयुः ॥

Hemādri, Pari. I, 999; G.R., 155; Cha. A., 4a-b; Sadā., 14a.

33b. Cha. A. cites thus अङ्गुष्ठानामिकाभ्यां नेत्रे कनीनिकाङ्गुष्ठाभ्यां श्रोत्रे and omits the rest.

Sadā. cites thus :—सूर्य कनीनिका मध्यमावङ्गुष्ठोऽग्निः तस्मादेभिः स्पृशेत् ।

G.R. cites from the beginning upto शिरः

33c. G. R. संस्पृशेत्

33d. G. R. omits च

33e. Hemādri. कनिष्ठिका

33f. G. R. मध्यमाङ्गुष्ठाभ्यां नाभिम्

FRAGMENT 28.

अङ्गुष्ठमूलेन द्विः परिमृज्यान्निर्लेपपाणिः कृतशौचः ॥

Hemādri, Pari. I, 996.

FRAGMENT 29.

अङ्गुष्ठमूलस्योत्तरतो रेखा ब्राह्मं तीर्थं त्रिराचामेत् ॥

Hemādri, Pari. I, 991.

FRAGMENT 30.

अथ प्रथमकल्पः। प्राङ्मुख उदङ्मुखो वा उपविश्य अन्तर्जानुः हस्तौ कृत्वा शुद्धा आपः संगृह्य आ मणिबन्धनात् पाणी प्रक्षाल्य अभिमुखं ब्रह्माद्वारं मनुष्याणां प्राचीनं चैव देवानां पितृणां दक्षिणं स्मृतम् ॥

Hemādri, Pari. I, 989.

FRAGMENT 31.

हृदयङ्गमाभिरद्भिः ब्राह्मणः। राजन्यः कण्ठगाभिः। आस्यंप्राप्ताभिः वैश्यः। स्त्रीशूद्रः[द्रौ] स्पृष्टाभिः ॥

Hemādri, Pari I, 986.

FRAGMENT 32.

अशृताभिरफेनाभिरबुद्बुदाभिः ॥

Hemādri, Pari. I, 984.

FRAGMENT 33.

भूमिगता बिन्दवः परामृष्टाः पूताः विप्रुषः शुद्धाः[34] [35]विलोमक्लिन्नेष्वाचामेत् ॥

Hemādri, Pari. I, 973; G.R., 169; G.P. Acā., 53; Śuddhi K., 353; V.M. Śuddhi. 142.

The Śuddhi K. reads मुखच्युता भूमिगता बिन्दवः परामृष्टाः शुद्धाः।

34. G. R. omits शुद्धाः

35. G. R. रोमद्वयक्लिन्ना वा G. P. द्विरोम

FRAGMENT 34.

द्वादशवर्षाण्येकवेदे ब्रह्मचर्यो[चर्यं] चरेत् प्रतिद्वादशं वा सर्वेषु ग्रहणान्ते वा ॥

Hemādri, Pari. II, 779.

FRAGMENT 35.

[36] द्वादश षोडश विंशतिश्च इत्यतीता अविरुद्धाः काला भवन्ति ॥

Hemādri, Pari. II, 752; V.M. Saṁ., 342; Govind. Saṁ., 123b.

36. The reading in Hemādri is—
द्वात्रिंश षोडश चतुर्विंशतिश्चेत्यतीताविरुद्धकाला भवन्ति ॥

FRAGMENT 36.

शुक्लचतुर्दश्यां सर्वासु चाष्टमीषु नक्तमनध्यायः अष्टकावर्जम् ॥

Hemādri, Pari. II, 759; V.M. Saṁ., 528.

FRAGMENT 37.

एकादशाहं भुक्त्वा रात्राविन्द्रधनुर्दृष्ट्वा वज्रपतनादाचार्यमरणात् सूर्याचन्द्रमसोरुपप्लवात् केतुदर्शननिर्घातभूमिचलनोदकेषु एकस्मिन् त्रिरात्रम् । श्रोत्रियमरणे सन्ध्यास्तमिते करकापतने नीललोहितप्रादुर्भावे च ॥

Hemādri, Pari. II, 763.

FRAGMENT 38.

पौषप्रभृतयः[37] कृष्णे भवाः तिस्रोऽष्टका [37a]मार्गशीर्षप्रभृतय इत्येके ॥

Apa., I, 146; S.C. Saṁ., 155; Hemādri, Pari. II, 760; P.M., I, i. 157.

37. P. M. omits पौषप्रभृतयः Hemādri प्रोष्ठप्रभृतयः
37a. Hemādri. मार्गशिरः

FRAGMENT 39.

यदा वर्षास्वेव विद्युत्स्तनितं वा तदा स ज्योतिः ॥

Saṁ. M., 38.

FRAGMENT 40.

अथ गृहस्थधर्मोऽश्वरिष्यन्नलोपेन धर्मस्य वृत्तिमुपाददीत ॥

G.R., 417.

FRAGMENT 41.

[38]पर्वसु न तैलं न मैथुनं न क्षुरं न मांसमुपेयात्। नामावास्यायां [39]हरितमपि छिन्द्यात्[40] ॥

Hemādri, Pari. II, 684; S.C. Āh. 331; G.R., 410; V.K. 86.

38. Hemādri reads न पर्वसु तैलं क्षुरं मैथुनं मांसमित्युपेयात् and omits the rest. G. R. also reads in the same way as Hemādri but does not omit the rest.

39. G. R. तृणानि

40. S.C. reads only the latter sentence.

FRAGMENT 42.

अयुग्मेन [40a]चरतः स्त्री जायते युग्मे पुमान् भवति। [40b]संवृते देशे मैथुनमाह्वयेत्। न[40c] प्रथमे न द्वितीये न तृतीये न चतुर्थे आह्वयेत् ॥

S.C. Sam., 38; V.M. Sam., 156; Hemādri, Pari. II, 725; G.R., 405; S.R., 688.

40a. G. R. आचरतः

40b. S. R. cites only the second sentence and the reading there is आह्वयीत।

40c. Except G. R., the rest cite from here.

FRAGMENT 43.

न शीर्णायां खट्वायामुपविशेत्। नाद्वारेण प्रविशेत्। [40d]ना दीक्षितः कृष्णचर्मणि सुप्यात्। न सन्धिवेलायां शयीत। नान्यपूर्वे। नानुवंशास्तीर्णे नाश्मपीठोपधाने न तिर्यगुदक्प्रत्यक्शिराः। न नग्नो नाशुचिः न चासने नोच्छिष्टे न प्रगे। नोच्चैः निशायां भाषेत ॥

G.R., 398; Sadā., 174b.

40d. Sadā. cites only this sentence.

FRAGMENT 44.

सर्व एव गृहस्थमूलास्तदुपजीविनः ॥

G.R., 306.

FRAGMENT 45.

तस्माद्रक्षेत भार्याः सर्वतो मा स्म वर्णसङ्करा भवन्तीत्याह ।

अप्रमत्ता रक्षत तन्तुमेनं मा वः क्षेत्रे परबीजानि वाप्सुः । भार्यां रक्षत कौमारीं बिभ्यतः पररेतसः इति । [40e] स्त्रियो गृहदेवतास्तासां न शौचं न व्रतं नोपवासः । पतिशुश्रूषया[40f] गच्छन्ति परमां गतिमिति च ॥

Bāla., I, 216 ; S.C. Vyava, 252.

40e. S. C. cites only from here.

40f. S. C. adds एव स्त्रियः

FRAGMENT 46.

[40g]परकृतान् सेतून् कूपांश्च वर्जयेत् । अंशभाक् तत्र सेतुकृत् । त्रीन् पिण्डानुद्धृत्य स्नायात् ॥

K.V., 328 ; G.R., 193 ; Bāla. I, 420.

40g. The reading in the K.V., is:—

परकृतनिपानकूपांश्च वर्जयेदंशभाक् । तत्र सेतोः त्रीन् पिण्डानुद्धृत्य स्नायात्.

Bāla omits from here to तत्र

FRAGMENT 47.

[40h]कलिलकाशश्वासागमे च रथ्याचत्वरश्मशानाक्रान्तेषु च आचान्तः पुनराचामेत् ॥

G.R., 167 ; Suddhi K. 350.

40h. The reading in Suddhi K. is :—

कलिलकासश्वासमेव रथ्याचत्वरश्मशानानि चङ्क्रम्य आचान्तः पुनराचामेत् ॥

FRAGMENT 48.

[40i]उच्छिष्टं रेतो मूत्रं संस्पृश्य उन्मृज्याचम्य प्रयतो भवति । प्रक्षाल्य च तं प्रदेशमुच्छिष्टादिलिप्तकायभागम् ॥

G.R., 163 ; V.M. Suddhi, 135.

40i. The reading in V, M. is :—

उच्छिष्टरेतोविण्मूत्रं संस्पृश्योन्मृज्याचम्य प्रयतो भवति । त्रिः प्रक्षाल्य च देशम् ॥

FRAGMENT 49.

न खादन् तिष्ठेत् । न हसन् जल्पेत । नाग्निं लङ्घयेत् । समिद्धमग्निं हस्ताभ्यां न स्पृशेत् । नोदके चिरं स्नायात् ॥

G.R., 585.

FRAGMENT 50.

विद्यापूर्तमिष्टं गावः शङ्खश्च ऊर्णाश्चेति विक्रेयाणि ॥

G.R., 436.

FRAGMENT 51.

[40j]कुलीरवार्ताकपूतनजलानर्तक्षिप्रगाश्चेत्यभक्ष्याः ॥

G.R., 379; Bāla. I, 443.

40j. G. R. कुलीरवातुकि Bāla. कुलीरवार्ताकपतनजलावर्त

FRAGMENT 52.

[40l]नापुष्पितं वृक्षमारोहेत् । नान्यस्मै दीयमानं प्रतिनुदेत् ॥

N.P., 539; Govind. Saṁ., 164-a.

40l. N. P. cites only the first sentence.

FRAGMENT 53.

[41] काण्डमूलपर्णपुष्पफलप्ररोहेषु[42] गन्धादीनां सादृश्येन प्रतिनिधिं कुर्यात् । [42a]सर्वालाभे यत्नः प्रतिनिधिर्भवति ॥

Hemādri, Vrata. II, 42; G.R., 131; V.M. Pari. 109; V. M. Tīrtha, 55.

41. G. R. पर्णमूलकन्दपुष्प

42. G. R. and V. M. प्ररोहरसगन्धा

42a. G. R. सर्वाभावे

FRAGMENT 54.

कामं तु पापीयसे दद्यादित्येके । न ज्यायसीं वृद्धिमुपाददीत [43]न त्वेव कनीयसीम् ॥

S.C. Āh. 472; G.R., 446.

43. S. C. omits this sentence.

FRAGMENT 55.

वार्धुष्यं परिहरेत् ॥

G. R. 445.

FRAGMENT 56.

[43a]लोके ब्राह्मणराजन्यौ[43b] वार्धुषिकं न दद्याताम् ।

[43c]अथाप्युदाहरन्ति—

समर्घं धनमुद्धृत्य महार्घं यः प्रयच्छति ।

स वै वार्धुषिको नाम ये च वृद्ध्या प्रयुञ्जते ॥

G.R., 344; Bāla. I, 368.

43a. Bāla. omits लोके

43b. Bāla. वार्धुष्यं

43c. G. R. omits from here to end.

FRAGMENT 57.

[44] ब्राह्मं प्राजापत्यं वा स्थानं ब्राह्मणस्य । ऐन्द्रं राजन्यस्य । मारुतं वैश्यस्य गान्धर्वं शूद्रस्य ॥

G.R., 481; Madana, 235.

44. The reading in Madana is as follows:—

ब्राह्मणस्य प्राजापत्यम्, ऐन्द्रं पदं क्षत्रियस्य, मारुतं वैश्यस्य, गान्धर्वं शूद्रस्य, स्वस्वस्थानं व्रजन्ति स्वे स्वे कर्मण्यभिरताश्च ये ॥

FRAGMENT 58.

न गोब्राह्मणाभ्यामन्तरेण व्यपेयात्[45] । अनुज्ञाप्य वा व्रजेत् ॥

Apa., I, 132; G.R., 549; V.M. Saṁ., 573; Govind. Saṁ., 163-b; Sadā., 30b; N.P. 522.

45. V. M. णाग्न्यन्तरे व्यवधेयात्; Govind णाग्न्यन्तरे व्यपेयात् अग्निं ब्राह्मणं च G. R. णाग्नीनामन्तरेणोपेयात् and omits the rest. Sadā. ब्राह्मणान्तरं N. P. णान्तरे व्यपेयात् and omits the rest.

FRAGMENT 59.

ततो ब्राह्मणहस्तेषु उदकपूर्वमर्घोदकं ददाति "या दिव्या" इत्युक्त्वा "असावेतत्ते अर्घ्योदकम्" इति । अप उपस्पृश्य । एवमेवेतरयोः ॥

Catur. Sa. 153.

FRAGMENT 60.

मृत्तिकां संगृह्य एका लिङ्गे अपाने पञ्च एकस्मिन् हस्ते दश उभयोः सप्त मृत्तिकाः। द्विगुणं ब्रह्मचारिणां वनवासिनां यतीनां च चतुर्गुणम्। गन्धलेपक्षयं यावत् प्रक्षाल्याचम्य प्रयतो भवति ॥

G.R., 146.

FRAGMENT 61.

[45a]मत्तप्रमत्तोन्मत्तैः सह संभाषं[46] न कुर्वीत। न परस्त्रियं रहसि संभाषेत[46a]॥

G.R., 537; Madana, 118; V.M. Saṁ., 572; Govinda. Saṁ., 165-b; N.P., 507.

45a. G. R. मत्तोन्मत्तप्रमत्तैश्च

46. G. R. संभाषणं न कुर्यात्

46a. G. R. संभाषयेत् N. P. रहसि न संभाषेत.

FRAGMENT 62.

प्रयताय शुचये सर्वत्र देयं हव्यं कव्यं च। तस्मात् शुचिरिति विज्ञायते ॥

Hemādri, Pari. I, 380.

FRAGMENT 63.

[47]गन्धवर्णशुद्धा आपो भूमिगता वितृष्णा यत्र गोर्भवेत् [47a]विपर्यस्तमहोदकमपि वर्ज्यम् ॥

Hemādri, Pari. I, 619-20; V.M. Śuddhi, 103; Puru. Dra. 59a.

47. V. M. reads गन्धवर्णरसयुक्ताः शुद्धा आपो भूमिगताः and omits the rest.

47a. Puru. cites from here.

FRAGMENT 64.

[47b]सीसकायसपात्राणि रीतिशेषाणि पात्राणि चेत्ययज्ञियानि ॥

Hemādri, Pari. I, 676; Śrā. K. 153; Sadā. 97a; N.S. 411.

47b. The reading in Śrā. K. is as follows:—

लोहानां शीषकायसानि पाषाणहीनपात्राणि भग्नपात्राणि च [वर्जयेत्] ॥

The reading in Sadā. is:—

सीसकायसपाषाणहीनभग्नपात्राणि च वर्ज्यानि।

The reading in N. S. is सीसकायसरीतिपात्राण्ययज्ञियानि.

FRAGMENT 65.

[47c]उच्छिष्टोपेताभ्युक्षणाच्छुचिर्विण्मूत्रं संस्पृश्योन्मृज्य आचम्य प्रयतो भवति त्रिः प्रक्षाल्य च तं प्रदेशम् ॥

Hemādri, Pari. I, 794; G. P. Ācāra., 45; Sadā., 15b.

47c. The reading in G. P. is:—

उच्छिष्टरेतोमूत्रस्पर्शे उत्सृज्याचम्य

The reading in Sadā. is:—

उच्छिष्टरेतोविण्मूत्रं संस्पृशेन्मृज्याचम्य प्रयतो भवति and omits the rest.

FRAGMENT 66.

नानियुक्तः अग्रासनं गच्छेत् ॥

S.C. Āh., 618.

FRAGMENT 67.

आ हिमवत आ[47d] कुमार्याः सिन्धुर्वै तरणी नदी सूर्यस्योदयनं पुनः[47e] यावद्वा कृष्णमृगो विचरति तत्र धर्मः चतुष्पादो भवति ॥

Hemādri, Vrata II, 29; V.M., Pari., 58.

47d. V. M. आच

47e. V. M. पुरः

FRAGMENT 68.

केशकीटगवाघ्रातमन्नं हिरण्येन भसना स्पृष्टं प्रोक्षितं च ॥

Hemādri, Pari. I, 826.

FRAGMENT 69.

मधु सर्पिः फलं बालस्त्रीणामनुच्छिष्टम् ॥

Hemādri, Pari. I, 840.

FRAGMENT 70.

गौरजोऽश्वरजोवायुर्मक्षिका वेति [चेति] स्पर्शे मेध्यानि ॥

Hemādri, Pari. I, 839.

FRAGMENT 71.

दन्तवद्दन्तलग्नानां दन्तान्तरगतेषु च निगिरन्नेवान्तर्मुखे शुद्धः ॥

Hemādri, Pari. I, 975.

FRAGMENT 72.

चमसानां चोच्छिष्टगन्धहिरण्यरजतताम्राणामलेपानामद्भिः सलेपानां गोमयेन। भिन्नमभिन्नमिति न दोषः । कार्ष्णायसानां सिकताभिः । दाहेन मृन्मयानाम् । अद्भिः शैलानाम् । [47f]त्रपुसीसकानां गोमयतुषैः। कांस्यं भस्मना । काष्ठमयं तक्षणेन । क्षीरोदकाभ्यां शङ्खशुक्तौ । वस्त्राणां निर्णेजनेन । शैलवदुपलमणीनाम् । [47g]कृष्णाजिनानां गौरसर्षपैः ।[47h]गवाविबस्ताजिनानां बिल्वतण्डुलैः। कुतपानां अरिष्टैः॥

Hemādri, Pari. I, 813; V.M., Śuddhi, 115; Apa. I, 184.

47f. This sentence alone is cited by V. M. and is read thus:—
त्रपुसीसकानां गोमयतुषैः । तथोच्छिष्टस्नेहसंसृष्टे क्षारोदकाभ्यामञ्जकस्य ॥

47g. Apa. cites from here to the end of तण्डुलैः

47h. Apa. रौरववस्ता

FRAGMENT 73.

काष्ठं तृणं चाण्डालादिस्पृष्टमादित्यदर्शनात् पूतं भवति ॥

Hemādri, Pari. I, 817.

FRAGMENT 74.

यतिपात्राणामद्भिः शौचम् ॥

Hemādri, Pari. I, 815.

FRAGMENT 75.

[48] ताम्ररजतशङ्खशुक्त्यश्मस्फटिकानां भिन्नमभिन्नं [49]वेति न दोषः ॥

Kullūka, IV, 65; S.C. Āh., 601; Madana, 328.

48. Kullūka reads:— ताम्ररजतसुवर्णानां Madana reads ताम्ररजतसुवर्णशङ्खमुक्ताश्म

49. S. C. omits वा Madana omits वेतिन दोषः

FRAGMENT 76.

छागेन सर्वलोहानन्त्यम् ॥

Kullūka, III, 272.

FRAGMENT 77.

अथातः पङ्क्तिपावना भवन्ति । त्रिणाचिकेतः त्रिमधुः त्रिसुपर्णः चीर्णव्रतः छन्दोगो [49a]ज्येष्ठसामको [50]वेदाध्याय्यनूचानपुत्रो ब्रह्मदेयानुसन्तानः सहस्रदः [51]रुद्राध्यायी चतुर्वेदः [51a]षडङ्गवित् अथर्वशिरोऽध्यायी पञ्चाग्निः वेदजापी चेति[52] । तेषामेकैकः पुनाति[53] नियुक्तः [54]पङ्क्तिमूर्धनि सहस्रैरप्युपसेविताम्[55] ॥

S.C. Śrā., 189 ; P.M., I, ii, 342 ; Hemādri, Pari. I, 402 ; Nṛ. P. Śrā., 37.

49a. Hemādri and Nṛ. P. ज्येष्ठसामगो

50. Hemādri alone adds वेद ... पुत्रो.

51. P. M. and Nṛ. P. वेदाध्यायी

51a. Hemādri. वेदषडङ्ग

52. S. C. and Hemādri add पङ्क्तिपावनाः

53. P. M., Hemādri and Nṛ. P. add पङ्क्तिं

54. P. M. and Hemādri omit पङ्क्ति

55. P. M. उपहताम्. Hemādri रथाहूयताम् ।

FRAGMENT 78.

[55a]कुनखी श्यावदन्तः पित्रा विवदमानः स्त्रीचितः कुष्ठी पिशुनः सोमविक्रयी वाणिजको ग्रामयाजकोऽभिशस्तो वृषल्यामभिजातः परिवित्तिः परिविविदानो दिधिषूपतिः पुनर्भूपुत्रः चौरः काण्डपृष्ठः सेवकश्चेत्यभोज्यान्ना अपाङ्क्तेया अश्राद्धार्हाः । एषां भुक्त्वा दत्वा चाविज्ञानात् त्रिरात्रम् ॥

Apa., III, 290 ; Hemādri, Pari. I, 492 ; Vijñā. III, 290.

55a. The reading in Hemādri is as follows:—

कुनखिकिलाशिश्यावदन्ताः पित्रा विवदमानश्च यश्च स्त्रीजितः कुष्ठी क्लीबः कितवो दुर्वारो दुश्चर्मा सुरागर्मो विद्धप्रजननः पतितः पिशुनः सोमविक्रयी यज्ञवेदविक्रयी वाणिजको ग्रामयाजी मिथ्याभिशस्तो वृषल्यामभिजातः परिवित्तिः परिविन्दानो दिधिषूपतिः पुनर्भूपुत्रः गोलककुण्डाजाविकाश्चौरः काण्डपृष्ठः सेवकश्चेत्यपाङ्क्तेयाः । श्राद्धे चैतान भोजयेत् न यज्ञकर्मणि ॥

FRAGMENT 79.

सांवत्सरघाण्टिकग्रामकूटान्नं विषम् । [55b]तथा परिवित्तिपरिविद्धानविद्ध-[55c]प्रजननवृषलीपतिदिधिषूपतिपुनर्भूपुत्राणां रुधिरम् ॥

Apa. I, 164 ; S.C. Śrā., 240.

55b. S. C. omits तथा

55c. S. C. परिविद्धप्रजनन

FRAGMENT 80.

[55d]घृतेन मासं प्रीणाति । कालशाकेन द्विमासम् । यवाग्वपूपकृशरेण त्रिमासम् । मत्स्यैः चतुरो मासान् । आजेन मांसेन पञ्च । पायसेन षण्मासान् । शाकुनेन सप्त मासान् । अष्टौ मासानैणेयेन । नव मासान् पार्षतेन । दश मासान् गव्येन । एकादश मासान् माहिषेण । द्वादश मासान् छागेन । खड्गेन त्रयोदश मासान् । सर्वलोहच्छागेनानन्त्यम् ॥

Hemādri, Pari. I, 595 ; G.P. Kāla, 538.

55d. The G. P. cites only to the end of त्रिमासम् ।

FRAGMENT 81.

कामं दध्ना घृतेनाभिघारितं पर्युषितान्नं भुञ्जीत न उष्णं न स्विन्नं दद्यात् । न द्विःपक्वं दद्यात् ॥

Hemādri, Pari. I, 617.

FRAGMENT 82.

गृहमेधी नान्यस्यान्नं काङ्क्षेदिति । उदाहरन्ति—

परपाकमुपाश्नन्ति ये द्विजा गृहमेधिनः ।
श्वभासरासभानां ते योनिं गच्छन्ति दुर्धियः ॥

Hemādri, Pari. I, 770.

FRAGMENT 83.

गृहमेधी न शूद्रान्नमश्नीयात् । [56]अस्मात् ब्रह्मवर्चसं बलं तेज इति व्यपक्रामति ॥

Hemādri, Pari. I, 783 ; G.R., 335.

56. G. R. आयुर्बलं तेजः

FRAGMENT 84.

गणान्नं गणिकान्नं च दुष्कृतं वार्धुषेर्विष्ठा [57]सांवत्सरघाण्टिकग्रामकौटान्नं[58] विषं बन्धकीनां रेतः भिषक्शल्यकृतोः[59] पूयं [60]परिवित्तिपरिविविदानविद्धप्रजनन[61]

वृषलीपतिदिधिषूपतिअग्रेदिधिषूपतिपुनर्भूपुत्राणां रुधिरं पतितानां च [62]दुष्कृत-हेतुत्वात् दुष्कृतम् ॥

Hemādri, Pari. I, 782-3; G.R., 349; G.P., Ācāra, 429.

57. G. R. ज्यौतिषक

58. G. R. कूटान्नं

59. G. R. कृत

60. G. P. cites only from here and reads परिवित्तिपरिविदानप्रजनानां रुधिर-मन्नम् ॥ G. R. reads परिवित्तिपरिवेविदान

61. G. R. omits अग्रेदिधिषूपति

62. G. R. omits from here to the end.

FRAGMENT 85.

वृन्ताकनालिकापौत[63]कुसुंभावमन्तकाश्चेति [63a]शाकानामभक्ष्याश्च[63b]।

G.R., 357; P.M., I, ii, 378; N.S., 380; Nṛ. P. Śrā., 68.

63. G. R. पोतु Nṛ. P. पौतीक

63a. G. R. शाकदलानां Nṛ. P. omits from here.

63b. N. S. वृन्ताकं नलिका पोतकुसुम्भाश्मन्तकानि च शाकानामभक्ष्याः ॥

FRAGMENT 86.

ग्राम्यारण्याश्चतुर्दश [64]गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः [64a]पशवः । महिषवानरसरीसृपरुरुपृषतमृगाश्चेति सप्तारण्याः पशवः ॥

Apa. I, 173; G.P. Ācāra., 399. Bāla. I, 443.

64. Apa. cites from here to the end of ग्रम्याः पशवः,

64a. Bāla. omits this word.

FRAGMENT 87.

अथ रजस्वलां परिहरेत् । त्वाष्ट्रं विश्वरूपं जघान वज्रेणेन्द्रः । तं देवा भ्रूणह-त्रित्यवदन् । स स्त्रिय उपादधीत । अस्यै भ्रूणहत्यायै तृतीयं भागं प्रतीगृह्णीत वरं दास्यामि ततो अंशं तृतीयं ब्रह्महत्यायाः स्त्रियः प्रपद्यन्ते । एवं भूमिर्वनस्पतयश्चैकं तासां वरं तुष्टः प्रायच्छत् । भूमेः स्थिरत्वं वृक्षाणां छिन्नप्ररोहणं स्त्रीणां सर्वकाले

संभवः तस्माद्रजस्वलां नोपासीत । ब्रह्महत्याप्रमुक्तां तां चतूरात्रेण स्नातां सर्वकर्माणि कारयेत् ॥

G. R. 408.

FRAGMENT 88.

[64b] त्रिरात्रं मलवद्वासोधारयमाणा न स्नायात् । न भुञ्जीत । नाञ्जयात् । [64c] न नखान् निकृन्तेत् । नापमार्जयेत् । न रज्जुं स्पृशेत् । न दन्तान् धावयेत् । न गन्धान् सेवेत । न प्रणीयात् । न खर्वेण पिबेत् । न पर्णैश्च प्रयायिणीम् । न गोपीथं गवामिव जलादिपानम् ॥

Apa., I, 80 ; G.R., 408 ; G.P. Ācāra, 463 ; V.M. Śuddhi, 11.

64b. The reading in Apa. is :—

त्रिरात्रं मलवद्वस्त्रधारणम्। न स्नायान्नाभ्यज्यात् न नखान्निकृन्तेत् न रज्जुं सृजेत् न दन्तान् धावेत् न स्रजं धारयेत् न गन्धान् सेवेत न वृष्याणि न खर्वेण पिबेत् ।

The reading in G.P. is :—

मलवद्वासोधारयमाणा नोपमार्जयेत् न वस्त्रं स्रजं धारयेत् न गन्धान् सेवेत न विभूषयीत नाग्निं स्पृशेत् ॥

64c. V. M. cites only from न नखान् but the reading is as follows:—

न नखान्निकृन्तयेत् । नोपमार्जयेत् । न स्रजं सृजेत् । न गन्धान् सेवेत । न पर्णेन पिबेत् । न गोपीथेन ॥

FRAGMENT 89.

शुचिरित्यशुचिरिति प्रतिषेधो वाग्दुष्यानि वर्जयेत् । वाक्प्रशस्तानि च कुर्वीत ॥

Hemādri, Pari. I, 818.

FRAGMENT 90.

श्वः श्राद्धं करिष्यामीति सङ्कल्प्य [64d]ब्राह्मणान् [64e]सप्त पञ्च [65]वा श्रोत्रियान् [66]निमन्त्रयेत् । ....[67] प्राङ्मुखान् विश्वेदेवानुपवेशयेत्[67a] । पितॄन् दक्षिणपूर्वेण ॥

S.C. Śrā., 191; Hemādri, Pari. I, 1142, 1199; P.M., I, ii, 362; Madana, 461; S.M.P. Śrā., 391; N.S. 366.

64d. S. M. P. cites only from ब्राह्मणान् to निमन्त्रयेत् ।

64e. N. S. cites from here to निमन्त्रयेत्

65. P. M. and N. S. add द्वौ

66. P. M. आमन्त्रयेत्

67. Hemādri and Madana cite only from here.

67a. Hemādri (1199) adds बर्हिष्मत्स्वासनेषु

FRAGMENT 91.

ततो ब्राह्मणहस्तेषु उदकपूर्वं दर्भान् प्रदाय उदकपूर्वं अर्घ्योदकं ददाति "या दिव्या आपः" इत्यृचा[68] । "एतत्ते अर्घ्योदकम्" इत्यप उपस्पृशेत् इति । एवमेवेतरयोः ॥

S.C. Śrā., 307-8; P.M., I, ii, 410; S.M.P. Śrā., 429.

68. P. M. and S. M. P. read from here thus:—
इत्युक्त्वा "असावेतत्ते अर्घ्योदकम्" इत्यप उपस्पृश्य एवमेवेतरयोः ।

FRAGMENT 92.

"इदं हविः" इत्येवं साङ्गुष्ठमन्नविधं ब्राह्मणेभ्यो दद्यात् ॥

Śrā. K. 164; Śrā. V. 8.

FRAGMENT 93.

शुचौ देशे गवां गोष्ठेऽन्यागारे वा गोमयेनोपलिप्य पुष्पोपहारं कृत्वा ॥

Hemādri, Pari. I, 1165.

FRAGMENT 94.

दैवे सौवर्णानि पित्र्येषु राजतानि परिवेषपात्राणि ॥

V. M. Śrā. 157.

FRAGMENT 95.

[68a]तिला दौहित्रकुतपा इति पवित्राणि। [68b]श्राद्धे सत्यं चाक्रोधं च शौचं चात्वरां[68c] च प्रशंसन्ति ॥

Hemādri, Pari. I, 1011 and 1175; V.M. Śrā., 112; G.P. (Kāla), 518.

68a. V. M. omits तिला...इति ।

68b. Hemādri (1011) cites only from here to end.

68c. Hemādri (1175) चात्वारं

FRAGMENT 96.

देवांश्च पितॄंश्च आवाहयिष्य इत्यनुज्ञाप्य "सौम्याः सन्तु" इत्युक्त्वा अग्नौ करिष्यामीत्यनुज्ञाप्य ॥

Hemādri, Pari. I, 1223.

FRAGMENT 97.

ब्राह्मणानलङ्कृत्य मांसापूपदधिमधुघृतपायसकृसरफलविकारानिति मत्स्यांश्चोपसाधयेत् ॥

Hemādri, Pari. I, 1367.

FRAGMENT 98.

धूपगन्धमाल्यादर्शप्रदीपाञ्जनादीनि चोपहरेत् ॥

Hemādri, Pari. I, 1471.

FRAGMENT 99.

[68d]पवित्रैरभ्युक्ष्याचम्य "वसुभ्यो ब्रह्मणे वैश्रवणाय" इत्युदकं निनयेत्। "उदीरताम्" इति त्रिभिर्मन्त्रैः त्रीनुदकाञ्जलीन् निनयेत् पितृवंशस्य[68e] नाम गृह्णन्[68f]। आचार्याय मात्रे मातामहाय मातुलेभ्यश्च ॥

Hemādri, Pari. I, 940; Smṛti R. 150; N.P. 313.

68d. N. P. गुरुभ्यो ब्रह्मणे चैव श्रवणाय इत्युदकैः क्षिपेत्।

68e. N.P. पितृभ्यो

68f. The reading in Smṛtiratna has only a bare resemblance to this extract. The reading there is:—

स्वनामगोत्रग्रहणं पुरुषं प्रति तिलोदकाञ्जलीन् त्रींस्त्रिस्त्रैर्निक्षिपेत् ॥

FRAGMENT 100.

गन्धान् पितृगोत्रनाम गृहीत्वा अपः स्पृशेत् । एवमितरयोः धूपदीपमाल्याच्छादनमेवम् ॥

S.C. Śrā., 312.

FRAGMENT 101.

वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहाः [69]य एवं विद्वान् पितॄन् यजते वसवो रुद्रा आदित्याश्चास्य प्रीता भवन्ति ॥

S.C. Śrā., 300 ; Kullūka, III, 284 ; S.M.P., Śrā., 418-9, 471 ; D.K. 30 ; G.P. 562 ; V.M. Śrā., 13.

69. Kullūka and D.K. quote only from here. V. M. and G. P. cite य एव. : यजते alone.

FRAGMENT 102.

[70]" पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतं[71] जुहोमि स्वधा " । " इदं विष्णुर्विचक्रमे " इत्यनेनाङ्गुष्ठमन्ने चोदके चावधार्य[71a] [72]व्याहृतिपूर्वां गायत्रीं जप्त्वा वाग्यतः स्वदतेति ब्रूयात् ॥

Apa., I, 257 ; S.C. Śrā., p. 343 ; Hemādri, Pari. I, 1377 ; V. M. Śrā., 239.

70. S. C. quotes पृथिवी...स्वधा only.

71. S. C. omits अमृतं

71a. Hemādri चावधाय

72. Hemādri and V. M. omit from here to end.

FRAGMENT 103.

[72a] मासि मासि मृतस्य श्राद्धं कुर्यात् [72b]संवत्सरान्ते विसर्जनं [72c]नवममास्यम् ॥[72d]

Śrā. K. 354 ; V.M. Śrā 224 ; G.P. (Kāla), 416.

72a. G. P. मृतस्य मासि मासि

72b. V. M. and N. S. cite only from here. N. S. संवत्सरान्ते संसर्जनं नवममासीत्येके ॥

72c. G. P. नवमास्यं

72d. V. M. adds इत्येके

FRAGMENT 104.

श्राद्धानि षोडश कृत्वा नैव कुर्यात्सपिण्डनम् ॥

G.P. Kāla. 404.

FRAGMENT 105.

पञ्चम्यां पुत्रकामो यजेत । षष्ठ्यां पशुकामः । सप्तम्यां [73]वृद्धिकामः । अष्टम्यामन्नाद्यकामः । नवम्यां ब्रह्मवर्चसकामः । दशम्यां सर्वकामः । एकादश्यां धनकामः । द्वादश्यां क्षेत्रकामः । त्रयोदश्यां स्त्रीवशित्वम् । चतुर्दश्यां शस्त्रेण हतानाम् । सर्वकामोऽमावास्यायाम् ॥

Hemādri, Pari. I, 263 ; Pari. II, 509.

73. Hemādri, Pari II reads ऋद्धि

FRAGMENT 106.

बाले चाजातदन्ते त्रिरात्रं शावमाशौचम् ॥

Apa., III, 24.

FRAGMENT 107.

अकृतचूडानां त्रिरात्रम् । [73a] सगुणसपिण्डानां तु द्विवर्षपर्यन्तं सद्यः शौचम् ॥

S.C. Āśau., 27; S.M.P. Āśau., 510; Hāra. 40; Śuddhi K., 24.

73a. This portion is omitted in all except Śuddhi K.

FRAGMENT 108.

दत्ता कन्या परैव भवति ॥

S.C. Āśau. 34; S.M.P. Āśau. 516.

FRAGMENT 109.

मातृष्वसृतत्सुतदुहित्रोः पक्षिणी परस्परम् ॥

S.M.P. Āśau. 527.

FRAGMENT 110.

आहिताग्निश्चेत् प्रवसन् म्रियेत पुनः संस्कारं कृत्वा शावः शौचमिष्यते ॥

S.M.P. Āśau. 538; Srā., 137.

FRAGMENT 111.

षोडशाहं क्षत्रियस्य ॥

Hāra. 11.

FRAGMENT 112.

सूतिकां [74] पुत्रवतीं [75] स्नातां विंशतिरात्रेण [76] कर्माणि कारयेत् मासेन स्त्रीजननीम् ॥

Apa., III, 17; Vijñā., III, 17; S.C. Āśau., 5; Hāra. 20; Śuddhi, M. 5; Śuddhi K. 10; G.P. 289; Saṁ. R. 845; S.M.P. Āśau., 493; N.S. 479; V.M. Śuddhi, 20; Tṛṁśa. Vyā. 56.

74. S. C. read पुत्रजननीं

75. Śuddhi M. and S. M. P. omit this word.

76. Hāra. सर्वकर्माणि

FRAGMENT 113.

असंबन्धिनो[76a] द्विजान् वहित्वा[76b] [76c]दग्ध्वा च सद्य शौचम् । [76d]संबन्धे [76e]तु त्रिरात्रम् ॥

Hāra., 87 ; V.M. Śuddhi, 35 and 70 ; N.S. 497.

76a. N. S. असंबन्धिद्विजान्

76b. Hāra. and V. M. 35. दहित्वा

76c. V. M. 35 omits this word.

76d. Hāra. omits from here to end.

76e. N. S. omits तु

FRAGMENT 114.

सूतके[77] सावित्र्याञ्जलिं[77a] प्रक्षिप्य [78]प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्[79] ॥

Apa., III, 17 ; S.C. Āśau., 74 ; S.C. Āh., 367 ; P.M., I, ii, 210 ; Madana, 420 ; Vijñā., III, 17 ; Hemādri, Pari II, 696 ; V.P. II, 228 ; Śuddhi, K. 192 ; G.P. Kāla. 265 ; Saṁ. R., 840 ; N.S. 513.

77. Hemādri adds तु

77a. Vijñā. and Śuddhi. K. read चाञ्जलिं

78. S. C. reads प्रदक्षिणीकृत्य Madana. दक्षिणं N. S. omits प्रदक्षिणं कृत्वा

79. Hemādri कुर्वीत G. P. adds एतावत्कार्यम् ॥

FRAGMENT 115.

नित्यानि निवर्तेरन् वैतानवर्जं [79a]शालाग्नौ चैके [79b]अन्य एतानि कुर्युः ॥

Vijñā ; III, 17 ; S.C. Āśau, 77, V.M. Śuddhi, 84 ; S.R., 839 ; S.M.P. Āśau., 479 ; Tṛṁśā. Vyā. 147.

79a. S. C. omits from here to end.

79b. S. M. P. and Tṛṁśa. Vyā. omit from here to end.

FRAGMENT 116.

अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहणे आर्षेयेण जाताः ते [80]असंहतकुलीनाः द्व्यामुष्यायणा भवन्ति ॥

Ujjvalā, II, vi, 13 ; S.M.P. Varṇā, 129 ; Āśau., 521.

80. S. M. P. संहता गोत्राः

FRAGMENT 117.

परिषद्गामि वा श्रोत्रियद्रव्यं न राजगामि न हार्यं राज्ञा देवतागणसंस्थितं न निक्षेपोपनिधिक्रियाक्रमागतं न बालस्त्रीधनानि । एवं ह्याह—

न हार्यं स्त्रीधनं राज्ञा तथा बालधनानि च ।
नार्याः षडागमं वित्तं बालानां पैतृकं धनम् ॥

Apa., II, 136.

FRAGMENT 118.

पैतृके विभज्यमाने दायाद्ये भ्रातॄणां समो विभागः ॥

V.M. Vya. 442.

FRAGMENT 119.

अपुत्रस्य स्वर्यातस्य भ्रातृगामि धनम् । तदभावे मातापितरौ लभेताम्, पत्नी वा ज्येष्ठा ॥

Apa., II, 136.

FRAGMENT 120.

प्रेतायां पुत्रिकायां न भर्ता [80a]धनमर्हति । [80b]अपुत्रायां मात्रा श्वश्र्वा वा तद्ग्राह्यम् ॥

Apa., II, 145, Bāla., II, 268.

80a. Bāla. द्रव्यं

80b. Bāla. अपुत्रायां कुमार्यां मात्रा स्वश्र्वा वा

FRAGMENT 121.

मधुमांसप्राशने त्रिरात्रमुपवासः[80c] पुनरुपनयनं च ॥

Apa., III, 283; S.R. 281.

80c. Apa. omits this word.

FRAGMENT 122.

सोमविक्रयी प्रजापत्यम् ॥

D.K., 101.

FRAGMENT 123.

प्रातस्सायमाचितमेकरात्रश्च ॥

D.K., 108.

FRAGMENT 124.

त्रिवर्षं स्थानासनाभ्यां नक्तमश्नीयात् गोघातकः शुद्धयति । संवत्सरं प्राजापत्येन वा ॥

Apa. III, 270.

FRAGMENT 125.

गोघ्नो[81] यवागूं प्रसृतितण्डुलश्रृतां मासं[82] भुञ्जानो गोभ्यः प्रियं कुर्वाणः[83] शुद्धयेत् ॥

Viśva., III, 262; Vijñā., III, 264; Apa. III, 264.

81. Vijñā. adds मासं

82. Vijñā. omits मासं

83. Vijñā. कुर्वन् शुद्धयति

FRAGMENT 126.

द्वादशाहे [84]तु संपूर्णं वपनम् ॥

Madana, 783; Prā. M., 15; Nṛ. P. Prā., 23.

84. Prā. M. and Nṛ. P. संपूर्णे

FRAGMENT 127.

भक्ष्यभोज्यान्नस्योदरपूरणमात्रहरणे [85]त्रिरात्रमेकरात्रं वा पञ्चगव्याहारता[86] ॥

Apa., III, 268; Vijñā., III, 265; P.M., II, ii, 111.

85. P. M. त्रिरात्रं पञ्चगव्याहारः

86. Vijñā. हारश्च

FRAGMENT 128.

अवकीर्णी गर्दभाजिनं वसेत् । संवत्सरं प्राजापत्यं चरेत् ॥

Prā., M. 86.

FRAGMENT 129.

आरामितटाकोदपानपुष्करिणीसुकृतसुतविक्रये त्रिषवणस्नायी अधःशायी [87] ब्रह्मचारी चतुर्थकालाहारः संवत्सरेण पूतो भवति ॥

Vijñā., III, 288; P.M., II, ii, 132; Prā. M., 114; Nṛ. P. Prā. 126.

87. Vijñā. omits this word.

FRAGMENT 130.

ब्राह्मस्य लवणं पक्वान्नं मधु क्षीरं दधि घृतमुदकं सर्वगन्धास्तिला रक्तवासोगुडतैलग्राम्यपशूनामेकशफः केशरिणश्च सर्वे चारण्याः पशवो विद्या गावः शङ्खश्चोर्णाश्चेति विक्रयणेनैकेषामेकस्मिन् प्राजापत्यं चरेत ॥

Prā. M., 113.

FRAGMENT 131.

शूद्रयाजकः [88]सर्वद्रव्यपरित्यागात् पूतो भवति । प्राणायामसहस्रेषु दशकृत्वोऽभ्यस्तेषु ॥

P.M., II, ii, 115; Prā. M., 115; S.M.P. Prā., 75.

88. S. M. P. तद्द्रव्य

FRAGMENT 132.

नष्टे दण्डकाष्ठे भैक्षं दत्वा ब्राह्मणाय तदहरुपवसेत् । [89]अन्यं प्रयच्छेद्गुरुः । कमण्डलावप्येवमेव । नष्टायां मेखलायां [90]त्रिवृतमाचरेत् ॥

Apa., III, 282 ; P.M., II, ii, 148.

89. Apa. omits this sentence.

90. Apa. reads द्वे ऋचावुद्धरेत् "इयं दुरुक्तात्" इति

FRAGMENT 133

अग्न्युत्सादी तप्तकृच्छ्रेण ॥

Apa., III, 290.

FRAGMENT 134

अनृतेनाभिशस्तः[91] कृच्छ्रं[92] चरेत्[93] । [93a]मासं पातकेषु । महापातकेषु[94] द्विमासम् ॥

Apa., III, 287 ; Vijñā., III, 287 ; P.M., II, ii, 152 ; Prā. M. 40 ; D.K., 104 ; Nṛ. P. Prā. 160.

91. Apa. Vijñā., D. K. and Prā. M. शस्यमानः

92. Prā. M. adds मासं

93. Prā. M. and Nṛ. P. पातकेषु द्विमासं कृच्छ्रम् ॥

93a. D.K. reads from here thus :— पातकेषु महापातकेषु च मासं कृच्छ्रं चरेत् ॥

94. Apa. omits महापातकेषु

FRAGMENT 135

अनुदकमूत्रकरणे सचेलस्नानं [95]व्याहृतिहोमश्च ॥

Madana, 256 ; S.M.P. Varṇā, 196.

95. S. M. P. omits from here.

FRAGMENT 136

त्रीणि पातकानि भर्तृवधो ब्रह्मवधः स्वगर्भपातनं चेति ॥

Hemādri, Pari. I, 846.

FRAGMENT 137

काकोलूककृकलासकङ्कवृकखरशृगालशशबर्हिणमूषकचक्रवाकहंसप्रवेणीनकुल-मण्डूकबिडालश्ववध एतेषामेकैकस्मिन् शूद्रवद्विहितः कल्पः ॥

Apa., III, 271.

FRAGMENT 138

[96] शुना दष्टस्त्रिरात्रमुपवसेत् द्विजश्च । ब्राह्मणस्तु शुना दष्टो गायत्र्यष्टसहस्राभिमन्त्रितं कृत्वोल्मुकेन दहेच्चतुर्भिः कलशैः स्नातः शुद्ध्यति । नदीसङ्गमे वा । बालस्यातुरस्य वा तत्र पिता मनसा ध्यायन् सर्वकार्याणि कुर्वीत । पितुरभावे सत्याचार्यः ॥

Apa. III, 277 ; P.M., II, i, 68 ; Prā. M., 108.

96. Apa. and Prā. M. quote this :—
शुना दष्टस्य त्रिरात्रोपवासः । विप्रगृहे वासश्च and only so far.

FRAGMENT 139

स्कन्दने छर्दने सचेलस्नानमनु[97]दकघृतप्राशनं च । [98]काककेशमल[99]स्पर्शने सचेलस्नानम्[100] । अनुदकमूत्रपुरीषकरणे सचेलस्नानम्, महाव्याहृतिहोमश्च[101] । [102]अस्नेहमस्थि संस्पृश्य सचैलस्नानम् । सस्नेहमस्थि संस्पृश्य सचेलस्नानम्, महाव्याहृतिहोमश्च । [103]श्वखरोष्ट्रचण्डालस्पर्शने सचेलस्नानम् ॥

S.C. Āh., 309-10 ; Hemādri, Pari. I, 800 ; V.M. Śuddhi, 149.

97. V.M. omits अनुदक

98. All except Hemādri cite from here. They read काकोलूकस्पर्शने सचेलं स्नानम् । अनुदकमूत्रपुरीषकरणे सचेलं स्नानं महाव्याहृतिभिः होमश्च ॥

99. V.M. मलने

100. V.M. adds घृतप्राशनं च

101. V.M. omits च Vijñā. omits from here to end. The rest except Hemādri omit from here to the end of होमश्च

102. V.M. omits this sentence.

103. Hemādri omits श्व

FRAGMENT 140

[104]अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः, पुनरुपनयनं च। अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रमभोजनम् । सर्वासां द्विस्तनीनां क्षीरपानेऽप्यजावर्ज्यमेतदेव ॥

Apa., III, 290 ; Vijñā., III, 290 ; Nṛ. P. Prā., 139.

104. Apa. reads अविखर्युष्ट्रीमानुषीदुग्धप्राशने पुनरुपनयनं प्राजापत्यं च and omits the rest.

FRAGMENT 141

हविषो हुत्वा संतर्प्याग्निं समिधं दत्त्वान्नम् "यदन्नमद्मि बहुधा विरूपम्" इति चोक्त्वानुमन्त्रयेत्तिः । स्विष्टकृतमग्निकार्यं कृत्वानुज्ञातो भुञ्जीत वाग्यतः ॥

Apa, I. 31.

FRAGMENT 142

पितृपत्न्यः सर्वा मातरः । तद्भ्रातरो मातुलाः तद्भगिन्यो मातृष्वसारः तद्दुहितरश्च भगिन्यः । तदपत्यानि भागिनेयानि । अन्यथा संकरकारिण्यः ॥

P.M. I, ii, 64.

FRAGMENT 143

श्वोभूतेऽग्निमुपसमाधाय शान्त्युदकं कुर्यात् ॥

Hāra. 195.

FRAGMENT 144

यदा विशोधिभूतयो न पुष्पं क्षरस्तु तदा भवतो गर्भौ सूतविशेषविपर्ययात् ॥

Bāla. I, 615.

FRAGMENT 145

प्रधानसचिवान्यङ्गानि भवन्ति [105]न भवन्ति वा[106] ॥

Hemādri, Pari. II, 922; Madana. 184; Sadā. 60b.

105. Sadā. omits from here to end.
106. Hemādri च

LIST OF ABBREVIATIONS

Ācāra M.	.. Ācāra Mayūkha of Nīlakaṇṭha, Hindu Law Texts Series.
Apa.	.. Aparārka's commentary on the Yājñavalkya Smṛti, Ānandāśrama Sanskrit Series.
Bāla.	.. Bālambhaṭṭī on the Mitākṣarā of Vijñāneśvara, Hindu Law Texts. References are to volume and pages.
Catur. Sa.	.. Caturviṁśatimata Saṁgraha of Bhaṭṭoji Dīkṣita, Benares Sanskrit Series.
Cha. Ā.	.. Chandoga Āhnika. The references are to the folios in the manuscript, belonging to the Royal Asiatic Society of Bengal.
D. K.	.. The Dīpakalikā, a commentary on the Yājñavalkya Smṛti by Śūlapāṇi, Hindu Law Texts Series.
Govind. Saṁ.	.. Govindārṇava, Saṁskāraprakaraṇa. The references are to the folios in the manuscript belonging to the India Office, London.
G. P. Ācāra.	.. Gadādhara Paddhati, Ācārasāra, Bibliotheca Indica.
G. P. Kāla.	.. Gadādhara Paddhati, Kālasāra, Bibliotheca Indica.
G. R.	.. Gṛhastharatnākara of Caṇḍēśvara, Bibliotheca Indica.
Hāra.	.. The Hāralatā of Aniruddhabhaṭṭa, Bibliotheca Indica.
Hemādri, Pari I, II	.. The Caturvarga Cintāmaṇi of Hemādri, Pariśēṣakhaṇḍa, Vols. I and II. Bibliotheca Indica.
Do. Vrata I, II.	.. Do. Vratakhaṇḍa, Do.
Kullūka	.. The Manvarthamuktāvalī of Kullūkabhaṭṭa, commentary on the Manusmṛti, Bombay.

K. V.	.. Kālaviveka, Bibliotheca Indica.
Madana.	.. Madanapārijāta, Bibliotheca Indica.
M. M. Y.	.. Mitramiśra on Yājñavalkya Smṛti, Benares.
N. P.	.. Nityācārapradīpa, Bibliotheca Indica.
Nṛ. P. Prā.	.. Nṛsiṁhaprasāda of Dalapati, (Prāyaścittasāra), Princess of Wales Saraswati Bhavana Texts, Benares.
Nṛ. P. Śrā.	.. Nṛsiṁhaprasāda of Dalapati, (Śrāddhasāra), Princess of Wales Saraswati Bhavana Texts, Benares.
N. S.	.. Nirṇayasindhu, Venkateshwar Press, Bombay.
P. M.	.. Parāśara Mādhavīya, Bombay Sanskrit Series in two volumes of two parts each. The references are to the volume, part and page.
Prā. M.	.. Prāyaścitta Mayūkha, Hindu Law Texts Series.
Puru. Dra.	.. Puruṣottama's Dravyaśuddhiprakāśa. Government Oriental Mss. Library, Madras. The references are to the folios.
Sadā.	.. Sadācāracandrodaya. The references are to the folios in the Mss. deposited in the Royal Asiatic Society of Bengal.
Saṁ. M.	.. Saṁskāra Mayūkha, Hindu Law Texts Series.
S.C. Āh.	.. Smṛticandrikā of Devaṇabhaṭṭa (Āhnikakāṇḍa), Mysore.
S.C. Āśau.	.. Smṛticandrikā of Devaṇabhaṭṭa (Āśaucakāṇḍa), Mysore.
S.C. Sam.	.. Smṛticandrikā of Devaṇabhaṭṭa (Saṁskārakāṇḍa), Mysore.
S.C. Śrā.	.. Smṛticandrikā of Devaṇabhaṭṭa (Śrāddhakāṇḍa), Mysore.
S. C. Vyava	.. Smṛticandrikā of Devaṇabhaṭṭa, (Vyavahārakāṇḍa), Hindu Law Texts Series.
S.M.P. Āśau.	.. Smṛtimuktāphala (Āśaucakāṇḍa). Grantha edition.

S.M.P. Prā.	.. Smṛtimuktāphala (Prāyaścittakāṇḍa), Grantha edition.
S.M.P. Śrā.	.. Smṛtimuktāphala (Śrāddhakāṇḍa). Grantha edition.
S.M.P. Varṇā.	.. Smṛtimuktāphala (Varṇāśramakāṇḍa). Hindu Law Texts Series.
Smṛti R.	.. Smṛtiratna of Mādhava. References are to the pages in the manuscript deposited in the Government Oriental Mss. Library, Madras.
S. R.	.. Saṁskāra Ratnamālā of Gopīnātha, Ānandāśrama Sanskrit Series.
Śrā. K.	.. Śrāddhakaumudī, Bibliotheca Indica.
Śrā. V.	.. Śrāddhaviveka of Rudradhara, Benares.
Śuddhi K.	.. Śuddhikaumudī, Bibliotheca Indica.
Śuddhi M.	.. Śuddhi Mayūkha, Hindu Law Texts Series.
Tṛṁśa. Vyā.	.. Tṛṁśacchlokīvyākhyā, Ānandāśrama Sanskrit Series.
Ujjvalā	.. Haradatta's Commentary on the Āpastamba Dharmasūtra.
Vijñā.	.. Vijñāneśvara's commentary on the Yājñavalkya Smṛti, Bombay.
Viśva.	.. Viśvarūpa's commentary on the Yājñavalkya Smṛti, Trivandrum.
V. K.	.. Varṣakriyākaumudī, Bibliotheca Indica.
V. M. Pari.	.. Vīramitrodaya of Mitramiśra, Benares. (Paribhāṣāprakāśa).
V. M. Saṁ.	.. Vīramitrodaya of Mitramiśra, Benares. (Saṁskāraprakāśa).
V.M. Śuddhi.	.. Vīramitrodaya of Mitramiśra, Benares. (Śuddhiprakāśa).
V. M. Tīrtha.	.. Vīramitrodaya of Mitramiśra, Benares (Tīrthaprakāśa).
V. M. Vya.	.. Vīramitrodaya of Mitramiśra, Benares. (Vyavahāraprakāśa).
V. P.	.. Vidhānapārijāta, in three volumes, Bibliotheca Indica.